अभिलाषाष्टकं

अभिलाषाष्टकं

एकं ब्रह्मैवऽऽद्वितीयं समस्तं
सत्यं सत्यं नेह नानास्ति किंचित् |
एको रुद्रो न द्वितीयोव तस्थे
तस्मादेकं त्वां प्रपद्ये महेशं || 1 ||

कर्ता हर्ता त्वं हि सर्वस्य शंभो
नाना रूपेषु एकरूपोपि अरूपः |
यद्वत् प्रत्यक् धर्म एकोऽपि अनेकः
तस्मात् नान्यं त्वां विनेशं प्रपद्ये || 2 ||

रज्जौ सर्पः शुक्तिकायां च रौप्यं
नीरैः पूरः तन्मृगाख्ये मरीचौ |
यद्वत् तद्वत् विष्वक् एषः प्रपंचः
यस्मिन् ज्ञाते तं प्रपद्ये महेशं || 3 ||

तोये शैत्यं दाहकत्वं च वह्नौ
तापो भानौ शीत भानौ प्रसादः |
पुष्पे गंधः दुग्ध मध्येऽपि सर्पिः
यत्तत् शंभो त्वं ततः त्वां प्रपद्ये || 4 ||

शब्दं गृह्णासि अश्रवाः त्वं हि जिघ्रेः
अग्राणः त्वं व्यंघ्रिः आयासि दूरात् |
व्यक्षः पश्येः त्वं रसज्ञोऽपि अजिह्वः
कः त्वां सम्यक् वेत्ति अतः त्वां प्रपद्ये || 5 ||

नो वेद त्वां ईश साक्षात् विवेद
नो वा विष्णुः नो विधाताऽखिलस्य |
नो योगींद्राः नेंद्र मुख्याश्च देवाः
भक्तो वेदत्वां अतस्त्वां प्रपद्ये || 6 ||

नो ते गोत्रं नेश जन्मापि नाख्या
नो वा रूपं नैव शीलं न तेजः |
इत्थं भूतोपि ईश्वरः त्वं त्रिलोक्याः
सर्वान् कामान् पूरयेः तत् भजे त्वां || 7 ||

त्वत्तः सर्वं त्वं हि सर्वं स्मरारे
त्वं गौरीशः त्वं च नग्नः अतिशांतः |
त्वं वै वृद्धः त्वं युवा त्वं च बालः
तत्वं यत्किं नासि अतः त्वां नतोऽहं || 8 ||